# <u>संस्कृत वार्ताः</u>

दिनाङ्क :-04.12.2024 प्रातः - 06:55

अथ वार्ताः

रक्षामन्त्री/स्वीकृतिः

रक्षाधिग्रहणपरिषद् द्विसप्तत्यधिक-सप्तशतोत्तरैकविंशति-सहस्र-कोट्यधिक-रूप्यकाणां पञ्चभ्यः प्रस्तावेभ्यः अनुमोदनम् अकरोत्। नवदिल्ल्यां रक्षामन्त्रिणः राजनाथसिंहस्य अध्यक्षतायां परिषद् नौसेनायै नूतनानाम् एकत्रिंशत्-सङ्ख्याकानां 'वाटर्-जेट्-फास्ट्-अटैक-क्राफ्ट्' जलीय-द्रुतप्रहार-यानानां क्रयणाय अनुमोदितवती।

लोकसभा/बैंकीय-विधि-संशोधन-विधेयकम्-2024

लोकसभा ह्यः चतुर्विंशत्यधिक-द्विसहस्र-तमाब्दीयं बैंकीय-विधि-संशोधन-विधेयकं पारितवती। एतद्विधेयकस्य अन्तर्गतं चतुस्त्रिंशदधिक-नवदश-शत-तमाब्दीयस्य भारतीय-रिजर्व-बैंकाधिनियमस्य, ऊनपञ्चाशदधिक-नवदश-शत-तमाब्दीयस्य बैंकीय-नियमनाधिनियमस्य, पञ्चपञ्चाशदधिक-नवदश-शत-तमाब्दीयस्य भारतीय-राज्य-बैंकाधिनियमस्य, एतत्सदृश-विभिन्नानाम् अधिनियमानां च संशोधनस्य प्रावधानं कृतम् अस्ति। अनेन पदक्षेपेण प्रत्येक-बैंकलेखायाम् उत्तराधिकारिणां सङ्ख्या एकतः वर्धित्वा चत्वारि भवितुम् अर्हति। विधेयकमेतत् लेखापरीक्षकाणां पारिश्रमिक-विषयकं निर्णयं कर्तुं बैङ्केभ्यः अधिकारान् प्रदास्यति। विधेयकं प्रस्तूय वित्तमन्त्री निर्मला सीतारमणः अवदत् यत् प्रस्तावितेन संशोधनेन बैंकीय-क्षेत्रे सञ्चालनं सुदृढं भविष्यति ग्राहकसुविधाः च वर्धिष्यन्ते।

दिव्याङ्गा:/पदक्षेपा:

सामाजिक-न्यायाधिकारिता-मन्त्री डॉ.वीरेन्द्र-कुमारः ह्यः नवदिल्ल्याम् अन्ताराष्ट्रिय-दिव्याङ्गजन-दिवसस्य अवसरे अशेष-देशे दिव्याङ्गान् शक्तान् विधातुं षोडश पदक्रमान् आरब्धवान्। अत्रावसरे श्रीमता सिंहेन उक्तं यत् अयं प्रयासः समग्र-समाज-निर्माणस्य दिशि सर्वकारस्य दृढसंकल्पं दर्शयति।

प्रधानमन्त्री/आपराधिकविधय:

प्रधानमन्त्रिणा नरेन्द्र-मोदिना चण्डीगढे ह्यः नूतनाः आपराधिकविधयः राष्ट्राय समर्पिताः। अस्मिन् अवसरे केन्द्रीयः गृहमन्त्री सहकारितामन्त्री च अमितशाहः अपि उपस्थितः आसीत्। आयोजनं सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् नूतनानाम् आपराधिकविधीनां कार्यान्वयनम् अस्माकं संविधानेन अस्माकं देशस्य नागरिकाणां कृते ये आदर्शाः परिकल्पिताः तेषां पूर्तये दृढपदं वर्तते।

प्रधानमन्त्रिणा उक्तं यत् एते नूतनाः विधयः भारतम् औपनिवेशिक-विधि-विचारेभ्यः मुक्तं करिष्यन्ति। चण्डीगढे नूतनापराधिक-विधीनां सफल-कार्यन्वयनार्थं प्रधानमन्त्रिणा पञ्जाब-हरियाणोच्च-न्यायालयस्य विधिवेत्तारः चण्डीगढ-न्यायालय-सदस्याः च अभिनन्दिताः।

अस्मिन् अवसरे केन्द्रीयमन्त्री अमितशाहः अवदत् यत् त्रयः नूतनाः आपराधिकविधयः सम्पूर्णे देशे वर्षत्रयाभ्यन्तरे कार्यान्विताः भविष्यन्ति।

इसरो/प्रोबा-3

भारतीयान्तरिक्षानुसन्धान-संघटनम् अद्य अपराह्णे अष्ट-निमेषाधिक-चतुर्वादने श्रीहरिकोटायाः सतीश-धवनान्तरिक्ष-केन्द्रात् पी.एस्.एल्.वी.सी.-59-प्रोबा-3 इत्येतस्य प्रक्षेपणं करिष्यति। यूरोपीयान्तरिक्ष-संस्थायाः प्रोबा-3- प्रक्षेपणोपक्रमः भारतीयान्तरिक्षानुसन्धान-सङ्घटनस्य न्यू-स्पेस्-इण्डिया-लिमिटेड्-इत्येतस्याः वाणिज्यिक-शाखायाः सहयोगेन भवति।

राष्ट्रपतिः/ओडिशायात्रा

राष्ट्रपतिः द्रौपदी मुर्मूः गतसायं पञ्चदिवसीय-यात्रा-प्रसङ्गे स्वकीयं गृहराज्यम् ओडिशां प्राप्तवती। भुवनेश्वरे राज्यपालेन रघुवर-दासेन, मुख्यमन्त्रिणा मोहनचरण-माझिना अन्यैः वरिष्ठैः गणमान्यैः च जनैः तस्याः स्वागतं विहितम्। राष्ट्रपतिः अद्य पुरीनगर्यां 'ब्लू-फ्लैग्' -समुद्रतटे भारतीय-नौसेना-दिवस-समारोहस्य अन्येषु च अनेकेषु कार्यक्रमेषु सहभागं करिष्यति।

झारखण्डम्/मन्त्रिशपथग्रहणम्

झारखण्डे हेमन्त-सोरेन-प्रशासनस्य मन्त्रिमण्डलस्य शपथग्रहणसमारोहः दिसम्बर-मासस्य पञ्चमे दिनाङ्के गुरुवासरे भविष्यति। राज्यपालेन संतोष-कुमार-गङ्गवारेण राजभवने मन्त्रिणः पदगोपनीतायै शपथं ग्राहयिष्यन्ते। झारखण्ड-मुक्तिमोर्चा-संयुति-सन्नीते अस्मिन् प्रशासने एकादश मन्त्रिणः समाविष्टाः भविष्यन्तीति सम्भाव्यते। ध्यानास्पदमस्ति यत् हेमन्त-सोरेनः गतमासस्य अष्टाविंशति-दिनाङ्के झारखण्डस्य चतुर्दशतम-मुख्यमन्त्रित्वेन शपथवचनम् अग्रहीत्।

।।इति वार्ताः।।